"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥"
इति पुराणम् ॥
(सुष्ठु, मन्तुरपराधो यस्य ।)अल्पापराधिनि,त्रि॥
सुमन्त्रः, पुं, कल्किदेवस्य ज्येष्ठभ्राता । यथा,—
"कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः
तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः ॥"
इति कल्किपुराणे २ अध्यायः ॥
अपि च ।
"विशाखयूपभूपालः प्रायात् साधुजनप्रियः ।
कल्किं द्रष्टुं हरेरंशमाविर्भूतं तथा सबले ॥
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम् ।
गार्ग्यभार्ग्यविशालैश्च ज्ञातिभिः परिवारितम्॥"
इति तत्रैव ३ अध्यायः ॥
दशरथराजस्य सारथिः मन्त्री च । यथा,—
"तद्गच्छ त्वरितं सूत राजपुत्त्रं यशस्विनम् ।
राममानय भद्रं ते नात्र कार्य्या विचारणा ॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनि ।
तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत्
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम् ॥"
इति वाल्मीकीये रामायणे अयोध्याकाण्डे १४ सर्गः ॥
सुमित्रः,पुं, चतुर्व्विंशतिवर्त्तमानार्हत्मिन्तर्गत-विंशार्हत्पिता । इति हेमचन्द्रः ॥ इक्ष्वाकु-वंशीयबृहद्बलान्वयः सुरथराजपुत्त्रः । इति विष्णुपुराणे ४ अंशे २२ अध्यायः ॥
सुमित्रभूः,पुं, सगरः । स तु जिनानां चक्रवर्त्ति-भेदः । इति हेमचन्द्रः ॥
सुमित्रा, स्त्री,दशरथराजपत्नी । सा तु लक्ष्मण-शत्रुघ्नमाता । यथा, भट्टौ २ सर्गे ।
"प्रासोष्ट शत्रुघ्नसुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥"
तत्पर्य्यायः । लक्ष्मणप्रसूः २ । इति शब्दरत्ना-वली ॥
सुमुखं, क्ली, नखक्षतविशेषः । इति शब्दरत्ना-वली ॥ (शोभनं सुखमिति ।) उत्तमास्यञ्च ॥
सुमुखः, पुं, (शोभनं मुखं यस्य ।) गरुड़पुत्त्रः । (यथा, महाभारते । ५ । १०१ । २ ।
"वैनतेयसुतैः सूत षड्भिस्ततमिदं कुलम् ।
सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्च्चसा ।
सुरुचा पक्षिराजेन सुबलेन च मातले ! ॥")
गणेशः । शाकभेदः । नागभेदः । इति शब्द-रत्नावली ॥ (यथा, महाभारते । १।३५।१४।
"हस्तपिण्डः पिठरकः सुमुखः कौणपाशनः ।
कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः ॥")
पण्डितः । इति विश्वः ॥ सितार्ज्जकः । वन-वर्व्वरिका । वर्व्वरः । इति राजनिर्घण्टः ॥
सुमुखः, त्रि, (सुष्ठु सुखं यस्य ।) मनोज्ञः । सुन्दराननः । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २१ । १५ ।
"प्रांशुः सुमुखः सौम्यः पीनांसः सुद्विज-स्मितः ॥")
सुमुखसूः, पुं, (सुमुखस्य सूरुत्पत्तिर्यस्मात् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥ उत्तमाननपुत्त्र-पिता च ॥
सुमुखा, स्त्री, (शोभनं मुखं यस्याः । टाप् ।) सुन्दरी नारी । सुन्दरानना । इति भरत-द्विरूपकोषः ॥ सुमुखा शाला । इति मुग्ध-बोधव्याकरणम् । दर्पणः । इति केचित् ॥
सुमुखी, स्त्री, (सुष्ठु मुखं यस्याः । "स्वाङ्गा-च्चोपसर्ज्जनादसंयोगोपधात् ।" ४ । १ । ५४ । इति ङीष् ।) सुन्दरी नारी । सुन्दरानना । (यथा, कुमारे । १ । २६ ।
"उ मेति मात्रा तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ॥")
सुमुष्टिः,पुं,(मुष वधे+क्तिन् । शोभना मुष्टि-र्यस्मात् ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः॥
सुमूलः, पुं, (सुष्ठु मूलं यस्य ।) श्वेतशिग्रुः । इति राजनिर्घण्टः ॥
सुमूलकं, क्ली, (शोभनं मूलं यस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥
सुमूला,स्त्री,(शोभनं मूलं यस्याः ।) शालपर्णी पृश्निपर्णी । इति राजनिर्घण्टः ॥ सुन्दरमूल-युक्ते, त्रि ॥
सुमेखलः,पुं,(शोभना मेखला यस्मात् ।) मुञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेखलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) शोभनमेखलायुक्ते, त्रि ॥
सुमेधाः, [स्] स्त्री, (सुष्ठु मेधा यस्याः । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२। इति असिच् ।) ज्योतिष्मती । (सुष्ठु मेधा यस्य ।) सुबुद्धौ, त्रि । इति मेदिनी ॥ (यथा, भागवते । ८ । ४ । ३ ।
"इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ॥")
सुमेरुः,पुं,(सुष्ठु मिनोति क्षिपति ज्योतींषि इति सु+मि+"मिपीभ्यां रुः ।" उणा० ४।१०१। रुः ।) पर्व्वतविशेषः । तत्पर्य्यायः । मेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५ । इत्य-मरः । १ । १ ।५२॥ अमराद्रिः ६ भूस्वर्गः ७ । इति जटाधरः ॥ तद्विवरणं यथा,—
"एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरि-राजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजन-विततो मूले षोड़शसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥" ७ ॥
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुत-योजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भ-गिरय उपकॢप्ताः ॥ ११ ॥
चतुर्षु एतेषु चूतजम्बूकदम्बन्यग्रोधाः चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनो-न्नाहास्तावद्विटपविततयः शतयोजनपरि-णाहाः ॥ १२ ॥
ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभा-विकानि भारतर्षभ धारयन्ति ॥ १३ ॥
देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति ॥"१४॥
"मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उप-कॢप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २८ ॥
तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकॢप्ताः॥"२९॥
इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥
"अस्मिन्नैन्द्रीं पुरीं पूर्व्वस्यां मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चा-द्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम ।" इति च तत्रैव ।५।२१।७॥*॥
अपि च ।
"परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः ।
चातुर्व्वर्णः स सौवर्णश्चतुरस्रः समुच्छ्रितः ॥
नानावर्णः स पार्श्वे तु पूर्व्वान्ते श्वेत उच्यते ।
पीतन्तु दक्षिणं तत्र भृङ्गपत्त्रनिभं परम् ॥
उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः ।
मेरुस्तु शुशुभे दिव्यो राजवत् समधिष्ठितः ॥
आदित्यतरुणाभासो विधूम इव पावकः ।
योजनानां सहस्राणि चतुरशीतिरुच्छ्रितः ॥
प्रविष्टः षोड़शाधस्तादष्टाविंशतिविंशतिः ।
विस्तारात्त्रिगुणस्तस्य परिणाहः समन्ततः ॥
स पर्व्वतो महादिव्यो दिव्यौषधिसमन्वितः ।
भुवनैरावृतः सर्व्वैर्जातरूपपरिष्कृतैः ॥
तत्र देवगणाः सर्व्वे गन्धर्व्वोरगराक्षसाः ।
शैलराजे प्रमोदन्ते सर्व्वतोऽप्सरसस्तथा ॥
स तु मेरुः परिहतो भुवनैर्भूतभावनैः ।
यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः ॥
भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे ।
उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः ॥
विष्कम्भपर्व्वतास्तद्वन्मन्दरो गन्धमादनः ।
विपुलश्च सुपार्श्वश्च सर्व्वरत्नविभूषितः ॥"
इति मात्स्ये ८५ अध्यायः ॥ * ॥
किञ्च ।
"मध्ये पृथिव्यामद्रीन्द्रो भास्वान् मेरुर्हिरण्मयः
योजनानां सहस्राणि चतुरशीतिः समुच्छ्रितः॥
प्रविष्टः षोड़शाधस्ताद्धरण्यां धरणीधरः ।
तावत्प्रमाणा पृथिवी पर्व्वतस्य समन्ततः ॥
तस्य शृङ्गत्रयं मूर्द्ध्नि स्वर्गो यत्र प्रतिष्ठितः ।
नानाद्रुमलताकीर्णं नानारत्नोपशोभितम् ॥
मध्यगं पश्चिमं पूर्व्वं मेरोः शृङ्गाणि त्रीणि वै ।
प्रयुतोच्छ्रितमात्राणि हे शृङ्गे तस्य मध्यतः ॥
मध्यस्थं स्फाटिकं शृङ्गं वैदूर्य्यकरकामयम् ।
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम् ॥
योजनानां सहस्राणि नियुतानि चतुर्दश ।
उच्छ्रितं मध्यगं शृङ्गं स्वर्गो यत्र प्रतिष्ठितः ॥
प्रयुतान्तरितं शृङ्गं मूर्द्ध्नि च्छत्राकृति स्थितम्
पूर्व्वमध्यमशृङ्गाणां सकलं मध्यमस्य च ॥